"आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः"।
इति ऋतुसंहारे ॥)

आकरः, पुं, (आकीर्य्यन्ते धातवोऽत्र। आङ् + कॄ + अप्। यद्वा आकुर्व्वन्ति संघीभूय कुर्व्वन्ति व्यवहारमत्रेति वा। आ + कृ + घ।) धातुरत्नादेरुत्पत्तिस्थानं। तत्पर्य्यायः। खनिः २ इत्यमरः ॥ ("आकरे पद्मरागाणां जन्म काचमणेः कुतः"। इति हितोपदेशः।
"शैलेन्द्रो हिमवान् नाम धातूनामाकरो महान्"
इति रामायणम्।) समूहः।
("शब्दाकरकरग्राममर्थमण्डलमण्डलम्"।
इति कविकल्पद्रुमः।) श्रेष्ठः। इति मेदिनी ॥

आकर्णनं, क्ली, (आ + कर्ण + ल्युट्।) श्रवणं। ("मुदा तदाकर्णनतत्परोऽभूत्"। इति नैषधे।)

आकर्षः, पुं, (आकृष्यते इति। आ + कृष + घञ्।) पाशकः। पाशा इति भाषा। अक्षक्रीड़ा। पाशा खेला इति भाषा। सारिफलकः। इत्यमरः॥ छक इति भाषा। (यथा महाभारते।
"आकर्षस्ते वाक्फलः सुप्रणीतो
हृदि प्रौढ़ो मन्त्रपदः समाधिः"।
इन्द्रियं। धनुरभ्यासवस्तु। आकर्षणं। इति मेदिनी ॥ आकृष्यते अनेन। आँकुषी इति भाषा। यथा। "आकर्ष इव स्वा आकर्षस्वः"। इति मुग्धबोधव्याकरणं। आकर्षतुल्य इति ज्ञापनार्थ इव शब्दः। इति दुर्गादासः॥ (अयस्कान्तः। निकषोपलः।)

आकर्षणं, क्ली, (आ + कृष् + ल्युट्।) आकर्षः। बलादानयनं। टानन् इति भाषा। यथा,—
"सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः।
केशाकर्षणनिर्धूतगौरवा मागमिष्यसि"॥
इति मार्कण्डेये देवीमाहात्म्यम् ॥ * ॥
तन्त्रोक्तकर्म्मविशेषद्वारा योषाद्यानयनं। यथा। अथाकर्षणं।
"आकर्षणविधानानि कथयामि समासतः।
यद्दृष्टं त्रैपुरे तन्त्रे यद्दृष्टं भूतडामरे॥
श्रीवीजं मान्मथं वीजं लज्जावीजं समुद्धरेत्।
प्रथमं प्रणवं दत्त्वा त्रिपुरादेविपदं ततः॥
अमुकीति पदं दत्त्वा आकर्षय द्विधा पदं।
स्वाहान्तं मन्त्रमुद्धृत्य जपेद्दशसहस्रकं॥
षट्कोणचक्रमालिख्य रक्तचन्दनकुङ्कुमैः।
षडङ्गं कारयेन्मन्त्री लज्जावीजसमन्वितं॥
षड्दीर्घभाक्स्वरेणैव नादविन्दुविभूषितं॥
रक्तपुष्पाक्षतधूपादिनैवेद्यैः प्रपूज्य तां।
भावयन् चेतसा देवीं त्रिनेत्रां चन्द्रशेखरां।
बालार्ककिरणप्रख्यां सिन्दूरारुणविग्रहां॥
पद्मञ्च दक्षिणे पाणौ जपमालाञ्च वामके।
मन्त्रस्यास्य प्रभावेण रम्भामपि तथोर्व्वशीं॥
आकर्षयेन्न सन्देहः किं पुनर्मानवीमिह ॥ * ॥
भूर्जपत्रे समालिख्य कुङ्कुमालक्तवारिणा॥
काश्मीरागुरुकस्तूरीरोचनामिलितेन च।
अनामारक्तमिश्रेण कमलाक्षीमनुं लिखेत्॥
ॐ क्रीँ कमलाक्षि अमुकीमाकर्षयाकर्षय ॐ फट्॥
इमं मन्त्रं जपेदादौ सहस्रैकं ततः पुनः।
तद्भूर्जपत्रमादाय गुलिकां कारयेत् सुधीः॥
तेनैवं साध्यपादोत्थमृत्तिकापङ्कवेष्टितां।
शोषितां तेजसा भानोर्वेष्टयेत् त्रिकटुकैः पुनः॥
प्रतिमां स्त्रीनिभां कृत्वा क्षिपेत्तस्यास्तदोदरे।
गुलिकां पातयेत् पात्रे प्रतिमां साध्यरूपिणीं॥
तादृशाभिमुखो भूत्वा निर्ज्जने निशि साधकः।
ततस्तद्गतचित्तस्य तावत् कालं जपेन्मनुं।
यावदायाति सन्त्रस्ता मदनालसविग्रहा ॥*॥
अथान्यत् कथयाम्यत्र नृपाकर्षणहेतवे।
देवस्यापि नरस्यापि मोहिनीमन्त्रनायतः॥
अथ मन्त्रं महेशान्यास्तारमादौ ततस्त्रपां।
पञ्चशायकवीजञ्च दत्त्वाथ भुवनेश्वरीं॥
मोहिनीति च नामान्ते फट्कारं पुनरालिखेत्।
स्वाहान्तमन्त्रमुक्तञ्च मध्यवीजेन कारयेत्॥
षड़ङ्गान् दीर्घयुक्ताद्यैश्चक्रेऽष्टदलके यजेत्।
प्रथमं साध्यनामानि लेख्यानि च कर्णोदरे॥
महारजनरक्तेन पूर्व्वमन्त्रपदं युतं।
मोहिनीं पद्मकिञ्जल्के स्तम्भिणीं स्तम्भिनीं तथा॥
वशङ्करीं कुलेशीञ्च ततो वै विश्ववासिनीं।
आकर्षिणीं ततः स्त्रीन्नामर्च्चयेदष्टपत्रके॥
गन्धपुष्पादिधूपाद्यैर्भक्तियुक्तेन चेतसा।
लक्षजप्तेन सर्व्वेषां शीघ्रमाकर्षणं भवेत् ॥ * ॥
क्रीँ कालिकायै धीमहि
तन्नः कालि प्रचोदयात्।
ॐ आकर्षिणी वज्रधारिणी
ॐ फट् स्वाहा अमुकीमाकर्षय॥
प्रणवं पूर्व्वमुद्धृत्य उग्रसेनी ततः परं।
नितम्बिनी वह्निजाया विद्या परमदुर्लभा॥
सिन्दूरपुत्तलिं कृत्वा तस्या नाम हृदि विलिख्य पणमूल्येन ताम्बूलं समानीय आमशरावद्वये नैवेद्यं कृत्वा कृष्णाष्टोत्तरशततुलस्या मूलमन्त्रपठिते पुत्तल्या हृदि नामस्थाने ताड़िते सति सा समायाति"। इति श्रीकृष्णानन्दविद्यावागीशकृतषट्कर्म्मदीपिका तन्त्रसारश्च॥

आकर्षणी, स्त्री, (आकृष्यते अनया। आ + कृष् + ल्युट् + स्त्रियां ङीप्।) फलपुष्पाद्याकर्षकयष्टिकाविशेषः। आँकुषी इति भाषा॥

आकलनं, क्ली, (आ + कल् + ल्युट्।) आकाङ्क्षा। परिसंख्या। बन्धनं। इति मेदिनी॥ ("सेव्यापि सानुनयमाकलनाय यन्त्रा"। इति माघः।)

आकल्पः, पुं, (आ + कृप् + घञ्।) वेशः। इत्यमरः॥ कल्पनं। इति मेदिनी॥ मण्डनं। रोगः। इति हेमचन्द्रः॥ वेशार्थे यथा रघौ,—
("अकृतकविधिसर्व्वाङ्गीनमाकल्पजातं
विलसितपदमाद्यं यौवनं सा प्रपेदे"।
"स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत्"। इति साहित्यदर्पणे तृतीयपरिच्छेदे। कल्पपर्य्यन्ते च, यथा—"आकल्पं नरकं भुङ्क्ते"। इति स्मृतिः।)

आकल्पकः, पुं, (आकल्प + कन्।) तमः। मोहः। ग्रन्थिः। उत्कण्ठा। हर्षः। इति मेदिनी॥

आकषः, पुं, (आकष्यते यत्र, आ + कष् + अच्।) प्रस्तरविशेषः। इति शब्दरत्नावली॥ कष्टिपातर इति भाषा।

आकस्मिकं, त्रि, (अकस्मात् भवं। अकस्मात् + ठञ्।) अकस्मादुद्भवं। हठाज्जातं॥ ("आकस्मिकप्रत्यवभासां च देवीं वाचमनुष्टुभेन छन्दसा परिणतामभ्युदैरयत्"। इति उत्तररामचरितम्॥)

आकाङ्क्षा, स्त्री, (आङ् + काङ्क्ष + अच् + टाप्।) इच्छा। अभिलाषः। इत्यमरः॥ (रमणीयवस्तुस्पृहा। यदुक्तं साहित्यदर्पणे।
"आकाङ्क्षा रमणीयत्वात् वस्तुनो या स्पृहा तु सा"।
अपेक्षा। जिज्ञासा। अनुसन्धानं। यथा पदाङ्कदूते,—
"नाकाङ्क्षा किं भवति विपुलश्रीमतोऽर्थान्तरेषु"।)
न्यायमते। यत्पदमृते यत्पदान्वयबोधो न भवति तत्पदे तत्पदवत्ता। प्रतीतिपर्य्यवसानविरहः। इत्यालङ्कारिकाः॥

आकायः, पुं, (आङ् + चि + घञ्।) निवासः। इति वोपदेवः॥

आकारः, पुं, (आ + कृ + घञ्।) इङ्गितं। अभिप्रायानुरूपचेष्टाविष्करणं। संकेत ठार इत्यादि भाषा। आकृतिः। मूर्त्तिः। इत्यमरः॥
("तस्य संवृतमन्त्रस्य गूढ़ाकारेङ्गितस्य च"।
इति रघौ १। २०।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च"।
इति हितोपदेशे सुहृद्भेदः। मूर्त्तिः। "आकारसदृशप्रज्ञः"। इति रघौ १। १५।)

आकारगुप्तिः, स्त्री, (आकारस्य गुप्तिः।) रत्यादिसूचको मुखरागादिराकारः। आकारोऽङ्गवैकृतमिति वोपालितः॥ गुप्तिर्गोपनं। आकारस्य भयलज्जादिना गुप्तिराकारगुप्तिः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। अवहित्था २। इत्यमरः॥ अङ्गविकृतस्य रोमाञ्चादेराच्छादनात् अवहिःस्थितिरवहित्था। इति सारसुन्दरी॥ ("भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था"। इति साहित्यदर्पणम्।)

आकारगोपनं, क्ली, (आकारस्य गोपनं।) आकारगुप्तिः। रत्यादिसूचकमुखरागादिगोपनं। इति हेमचन्द्रः॥

आकारणं, क्ली, स्त्री, (आङ् + कृ + णिच् + ल्युट्।) आह्वानं। इत्यमरः॥ डाकन इति भाषा।
("तेन मणिभद्राकारणाय कश्चित् प्रेषितः"।
इति पञ्चतन्त्रम्।)

आकालिकं, त्रि, (समानकालौ आद्यन्तौ यस्य। "आकालिकडाद्यन्तवचने" इति समानकालस्याकालादेशः। इकट् प्रत्ययस्य निपातनात्। यद्वा अकाले भवम्। अकाल + ठञ्।) क्षणध्वंसि। इति धरणिः॥ समानकालीनजन्मविनाशशाली। इति संक्षिप्तसारः॥ अकालसम्भवं। आरम्भकालात् तत्सजातीयकालस्थायि। निमित्तं कालमारभ्य परेद्युर्यावत्कालः स एव कालस्तावदकाल-